# Ramanathashtakam 2

# રામનાથાષ્ટકમ્ ૨

## Document Information

Text title : rAmanAthAShTakam 2

File name : rAmanAthAShTakam2.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : Bhadragiri Achyuth Das Ji

Description/comments : Shri Kuladevata Bhakti Sudha | Shri Shankar Shanbhogue, Kuladevata Temple is at Ramnathi, Ponda, Goa. Sung by Shankar Shanbhogue

Latest update : January 29, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# રામનાથાષ્ટકમ્ ૨

રામનાથ નમોઽસ્તુતે જય સુન્દરાઙ્ગ નમોઽસ્તુતે ।
નીલકણ્ઠ નમોઽસ્તુતે જય રક્ષ માં શરણાગતમ્ ॥ ધ્રુ.॥

કોટી સૂર્યસમાનકાન્તિ સુશોભિતાનન મણ્ડલં
કઞ્જલોચનમદ્ભુતં સુરપુષ્પહારમગોચરમ્ ।
ક્ષીરસાગરમન્થનોત્કટ ઘોરવિષસંસેવિતં
રામનાથ વિલોલતાણ્ડવ નર્તનપ્રિય રક્ષ મામ્ ॥ ૧॥

દક્ષયાગવિઘાતકં શિવમીપ્સિતાર્થપ્રદાયિનં
ભસ્મરાગવિભૂષિતં નવબિલ્વપત્રસમર્ચિતમ્ ।
દેવતાસુરવન્દિતાઙ્ઘ્રિતરોરુહં પરમેશ્વરં
રામનાથ વિલોલતાણ્ડવ નર્તનપ્રિય રક્ષ મામ્ ॥ ૨॥

નારદાદિમુનીન્દ્રગાથિત રમ્ય પુણ્યકથાનકં
વેદગમ્યમનામયં ગજવક્ત્રષણ્મુખમણ્ડિતમ્ ।
લોચલત્રયમુગ્રતેજસમુદ્ભવં ત્રિપુરાન્તકં
રામનાથ વિલોલતાણ્ડવ નર્તનપ્રિય રક્ષ મામ્ ॥ ૩॥

કૃત્તિવાસકમુત્તમં ઘનકારજં ઘ્રતુવાસસં
ભક્તકષ્ટનિવારકં વૃષયાનકમ્યજનાયકમ્ ।
સર્વમૃત્યુભયાપહં દુરિતાપહં ભવતાપહં
રામનાથ વિલોલતાણ્ડવ નર્તનપ્રિય રક્ષ મામ્ ॥ ૪॥

રુણ્ડમાલિનમન્ધકાન્તગમાશુતોષમનિન્દિતં
મૃત્યુભીતમૃકણ્ડુબાલકપાલકં વરદાયકમ્ ।
ભાનુવંશલલામરાઘવ પૂજિતં પ્રમથાર્થિકં
રામનાથ વિલોલતાણ્ડવ નર્તનપ્રિય રક્ષ મામ્ ॥ ૫॥

શીલરાજવિહારિણં કરશૂલડમરુગધારિણં

શૈલજાશ્રિતચારુબામશરીરિણં સુમનોહરમ્ ।
શૈલતુલ્ય સુકેશિરં ભવમષ્ટમૂર્તીમનાગતં
રામનાથ વિલોલતાણ્ડવ નર્તનપ્રિય રક્ષ મામ્ ॥ ૬॥

રાગભોગસુદૂરભાસુરનાદહારજટાધર
કમ્ભુગન્ધર ચન્દ્રશેખર મારહરગઙ્ગાધર ।
વન્દિતાખિલ લોકવૈભવ શર્વ ભૈરવ શ્રીકર
રામનાથ વિલોલતાણ્ડવ નર્તનપ્રિય રક્ષ મામ્ ॥ ૭॥

દુઃખતરસંસારસાગરકારણૈક સુખાશ્રયં
દેવકેપદપઙ્કજં પરમાશ્રયે કરુણામ્બુધે ।
દોષપૂરિતમાદરાત્ક્ષણુ દોષહર જગદીશ્વર
પુષ્ટિવર્ધન તુષ્ટિવર્ધન તાવકં પરિપાલય ॥ ૮॥

શ્રીનિવાસતનૂજ કીર્તિતમષ્ટકં તવ તુષ્ટયે
યે પઠન્તિ નિરન્તરં ખલુ પ્રાપ્નુવન્તિ મનોરથમ્ ।
ત્વાં વિરામમનાર્તિ શઙ્કર ભૂતલે યદિરન્યથા
ધીરવત્સલ માં ન વિસ્મર રામનાથ કૃપાં કુરુ ॥ ૯॥

ઇતિ રામનાથાષ્ટકં સમ્પૂર્ણમ્ ।

A humble offering to the lotus feet of
Shri Ramanath Panchishta Devata

*Ramanathashtakam 2*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*